5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

5.D.17.13

Coll. No. 836

Title Pindadānavidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 836 Subject: Vedic Rit.

Title: Pindadāna vidhi.

Author: - Scribe: -

Date of the work: - Date of the Ms.: -

Place of the work: - Place of the Ms.: -

Size: 10.5" by 4.6" Extent: 20-31 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Begins abruptly.

स्नणाय तुभ्यम इं संप्रददे॥ अथ विसर्ज्जं प्रणम्य॥ ॐ [illegible] यस्मृत्याच नामोक्त्या
तापायज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वंदे [illegible] मच्युतं॥ श्री अच्युता
यनमः॥ आवाहनं न जानामि न जानामि विसर्जनं॥ पूजां चैव न जानामि त्वं गतिः
परमेश्वरः॥ इति नमस्कारं कृत्वा॥ ॥इति प्रायश्चित्तादि संकल्प विधिः समाप्तः॥
मरणांते षट्पिंडाः कर्त्तव्यास्तेषां प्रकारः॥ उत्क्रांतौ द्वार देशे विश्रांतौ चितायां
शव हस्ते च। ततो दहनानंतरं अस्थि संचयनेन॥ तत्र श्लोकः॥ उत्क्रांतौ द्वारदे
शे च विश्रांतौ च चिते करे। शव हस्ते स्थि संचयेन षट्पिंडाः प्रकीर्त्तिताः॥ इति श्लोकः।

ततः आचमनं प्राणायामः॥ दर्शोंकारवर्जितं कृत्वा। कालज्ञानं कृत्वा॥ विष्णुः ह
रिः॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यं
तरः शुचिः॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुरे। सप्तव्याध
दशार्णेषु मृगाः कालंजिरगिरौ। चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे॥
तेऽपि जाता कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥ प्रस्थिता दीर्घमध्वानं यूयं तेभ्यो वसी
दत। देवताभ्यो महायोगिभ्य एव च नमः॥ वार ३॥ श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं २०
गदाधरं॥ तस्यां चैव नमस्कारं ततः श्राद्धं प्रवर्तते। गयायां विष्णुरूपेण स्वयमे

व जनार्दनः। तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात्॥ देशकालपात्रद
व्यश्रद्धासंपत्॥ अपसव्यं॥ दृष्टिनिपातादिदोषाद्रक्षणस्पर्शाच्च उक्कां
त्यादि पंचपिंडं उद्दानोपहाराणां पवित्रता॥ तिलान्गृहीत्वा॥ भूः भुवः स्वः म
हः जनः तपः सत्यं॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोद
यात्। मधुवाता ऋतायते मधु क्षरंति सिंधवः॥ माध्वीर्नः संत्वोषधीः। मधुन
क्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पति
र्मधुमां अस्तु सूर्यः। माध्वीर्गावो भवंतु नः। मधु ३। तिलान्विकीर्य। अत्रा घत्रमु

कमासे अमुकपक्षे अमुकतिथौ अमुकवासरे यथा वर्त्तमाननक्षत्रयोगक
रणमुहूर्त्तसमवाये एवंगुणगण विशिष्टायां पुण्यतिथौ श्रीस्वोक्तपुण्यफलावा
प्त्यर्थं गुप्तेश्वरादितीर्थदेवतानां संनिधौ॥ एवंगुणविशिष्टे पुण्येकाले दशोच
अमुकसगोत्रस्य अमुकप्रेतस्य वा अमुकसगोत्रायाः उत्क्रांत्यादि पंचपिंड
दानमहं करिष्ये। सव्यं। शालिग्रामजलं जले वा पंचोपचारपूजनं वा कृत्वा इदं
विष्णुरित्यादि। श्रीविष्णवे इदमत्र। चंदनं समर्पयामि। पुष्पं समर्पयामि। धूपं स २१
मर्पयामि। दीपं समर्पयामि। नैवेद्यं समर्पयामि॥ श्रीविष्णवे नमः। नमस्कारं कृत्वा।

इति विष्णुपूजा॥ ॥ततः अपसव्यं॥ नैवेद्यार्थमन्नं ष्टपक पात्रे कृत्वा॥ स्तरणं।
पात्रे जपः। भूर्भुवः स्वः महः जनः तपः सत्यं। तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि। धियो यो नः प्रचोदयात्॥ मधुवाता ऋतायते मधुक्षरंति सिंधवः। मा
ध्वीर्नः संत्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधुद्यौरस्तु नः पिता।
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवंतु नः। मधु ३। पंचपिंड
स्थाने अवने जनं कृत्वा। उत्क्रांतनिमित्तं। अमुकसगोत्रे अमुकी प्रेते वा
अमुकसगोत्र अमुकप्रेत अवनेनिक्ष्व। द्वारदेशनिमित्तं अमुकसगोत्रे

अमुकीप्रेतेअवनेनिक्ष्व। विश्रांतनिमित्तं अमुकसगोत्रे अमुकीप्रेतेअवनेनि
क्ष्व। चितानिमित्तं अमुकसगोत्रे अमुकीप्रेतेअवनेनिक्ष्व। शवहस्तनिमित्तं
अमुकसगोत्रे अमुकीप्रेतेअवनेनिक्ष्व। ततःपंचपिंडदानं॥ उत्क्रांतनिमित्तं। अ
मुकसगोत्रे अमुकप्रेतेते। द्वारदेशनिमित्तं अमुकसगोत्रे अमुकीप्रेतेते। विश्रांत
निमित्तं अमुकसगोत्रे अमुकीप्रेतेते। चितानिमित्तं अमुकसगोत्रे अमुकीप्रेतेते।
शवहस्तनिमित्तं अमुकसगोत्रे अमुकीप्रेतेते॥ एवं ५॥ ततः प्रत्यवनेजनं। पूर्ववि २२
द्वा। उत्क्रांतनिमित्तं अमुकसगोत्रे अमुकीप्रेतेअवनेनिक्ष्व। इत्यादि एवं ५॥ अत्र

आच्छादनं॥ ५॥ एतत्तेवासः। चंदनं। तुलसीदलं। मानसोधूपः। दीपः। पिष्टमयंनैवेद्यं।
अत्राच्छादनचंदनगंधपुष्पधूपदीपनैवेद्यानियथाशक्तिनानिरुद्दंनैवेद्यंशास्त्रो
क्तफलावाप्यर्पअमुकसगोत्रे अमुकीप्रेतेपिंडार्चननैवेद्यंते॥ बद्धांजलिः। अ
त्राच्छादनचंदनगंधपुष्पधूपदीपनैवेद्यैःपिंडानामर्चनविधेःपरिपूर्णतास्तु। सव्यं।
आचमनं। सुप्रोक्षितं। शिवाआपः। सौमनस्यं। अक्षतं च। इतिताम्रपात्रमध्ये॥
अपसव्यं॥ आमान्नसंकल्पः। उत्क्रांतनिमित्तं कस्मैचिद्ब्राह्मणाय दास्यमानं आमा
न्नं सदक्षिणं यथोपस्करसहितं गोत्रे अमुकीप्रेतेते। द्वारदेशनिमित्तं कस्मैचिद्ब्रा

ह्मणाय दास्यमानं आमान्नं सदक्षिणं यथोपस्करसहितं गोत्रे प्रेतेते। विश्रांतनिमि
त्तं कस्मैचिद्ब्राह्मणाय दास्यमानं आमान्नं सदक्षिणं यथोपस्करसहितं गोत्रे प्रेतेते।
चितानिमित्तं कस्मैचिद्ब्राह्मणाय दास्यमानं आमान्नं सदक्षिणं यथोपस्करसहि
तं गोत्रे प्रेतेते। शवहस्तनिमित्तं कस्मैचिद्ब्राह्मणाय दास्यमानं आमान्नं यथोपस्क
रसहितं गोत्रे प्रेतेते॥ इति आमान्नसंकल्पः॥ बद्धांजलि॥ अस्य उत्क्रांत्यादि पंच
पिंडदानकर्मणो यन्न्यूनातिरिक्तं तत्सर्वं ब्राह्मणानां प्रसादात् श्रीविष्णुः प्रसादा २३
त् [illegible]श्वर इति। पदेवतानां प्रसादात् सर्वं परिपूर्णं। अनेन उत्क्रांत्यादि पंचपिं

डदानेन [illegible]त्रायाः प्रेतायाः प्रेतत्वविमुक्तिः शास्त्रोक्तवेदोक्तपुण्यफलावाप्तिः द
हनकर्मयोग्यता प्राप्तिः॥ न्यूनातिरिक्तं तत्सर्वं परिपूर्णं। तु हं कालंत्रिःसृष्टएया
मादेवान्तु हं पश्येमाऽत्र निर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदे
वहितं यदायुः॥ इति पिंडविसर्जनं। ततः पिंडद्वय अग्निस्थानं कृत्वा पृथक् कृ
त्य। पिंडत्रयं जलमध्ये प्रक्षिप्य। ततः चितास्थानं खनित्रेण खनित्वा निर्मलं कृ
त्वा। गोमयेनोपलिप्य। ततः अपणपालाशशाखया भूमिसंमार्जनं तत्र मंत्रः॥
अस्वरित। अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन्। अहोभिर्

ह्निरकुन्निर्यत्किंयमोददात्यवसानमस्मै। अन्फत्त्या। अपसव्येन दक्षिणाभिमु
खः पंचभूसंस्कारान्कुर्यात्। काष्ठैश्चितां रचयेत्। समृज्य उपलिप्य उल्लि
ख्य उद्धृत्य अन्फत्त्या तूष्णीं अपसव्येन अग्निस्थापनं। ततः मृत्तिकागोमय
मूत्रैः शावं प्रक्षाल्य। गोपिचंदनेन द्वादशांगे तिलकं कृत्वा प्रक्षालितं अहतवस्त्रं
परिधाय उत्तरीयवस्त्रं च धारयेत् नूतनं उपवीतं च। तुलसीपत्रैरलंकृत्य। ब्रह्मयं
धिं कृत्वा हस्तयोः दर्भपवित्रधारणं। एवं शावं अलंकृत्य प्राक्शिरसं उत्तरानचि २४
तौ निधाय। शावहस्तनिमित्तं पिंडं शावस्य दक्षिणहस्ते मुक्त्वा। चितानिमित्तं पिंडं चि

ताम ध्ये मुक्त्वा। हिरण्यशकलानि उद्धृत्य छिद्रेषु दत्वा मुखे नासिकाछिद्रद्वये नेत्रयोः
एकैकं अर्पयेत्। घृतेन शावस्य लेपनं। ततः शावमुखं वस्त्रेण पर्णेन वाच्छादयेत्॥ ॥
तत्र मंत्रः। अस्त्रवरः। अग्नेर्वर्म्म परिगोभिर्व्ययस्व संप्रोर्णुष्व पीवसा मेदसा च। नित्त्वा
धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यंखयाते॥ इति मंत्रः॥ ततः पुत्रो दक्षिणा
भिमुख उपविश्य। ततः शावस्य शिरसि हस्तं आरोप्य आकृतीमंत्रद्वयं पठेत्। अयं
वैत्वमस्मादयं तेयोनिस्त्वमस्य तेयोनिः जातवेदो वहस्वैनं सुकृतां यत्र लोकः॥
इयं वैत्वामजनयदयं त्वमधिजायतां। अमुकसगोत्रः अमुकप्रेतः स्वर्गाय लोका

यस्वाहा। स्त्रीचेत्। अमुकसगोत्राः अमुकीप्रेताः स्वर्गायलोकाय स्वाहा। स्त्रीविषयमंत्र
स्यइयं वै त्वामित्यूहो न भवति। रुद्रुविकारो न विद्यत इति स्मरणात्। अयं मा नाऽयं
पिताऽयं जीवात्वरागमत्। इदं तव प्रसर्पणं स्तुबंधवेहिनिरिहि। यपायुगं वरत्रयानत्यं
तिधरुणऽयुक्तं। एवादाधारते मनोजीवात्ताधारते मनोजीवात्तवेनमृत्यवे योऽरिष्ट
तातये। यमादहं वैवस्वतात्सुबंधोमनऽआनरं। एवादाधारतेमनोजीवातवेनमृत्य
वेऽपोऽअरिष्टतातये। न्यग्वातो वबाति न्यक्तपति सूर्यः। नीचीनमघ्याडुहेन्यग्भवतेर २५
पः। अयंमेहस्तोभगवानयंमेभगवत्तरः। अयंमेविश्वभेषजोऽयंशिवाभिमर्शनः
यथेयंपृथिवीमहीदाधारेमान्वनस्पतीन्। एवादाधारतेमनोजीवातवेनमृत्यवेपोऽअरिष्टतातये॥६३

इत्यादिवत्लिंगव्यत्ययेनाऽप्रसिद्धेः छांदसत्वात्। दृष्टानुविधिश्छांदसीपातंजलि
स्मरणाच्च॥ अपप्रत्त्वतं॥ ततोऽग्नौ प्रदीप्ते मे नमय इति संप्रदीप्ते दशर्चं जपित्वा॥ ॥
ऋक्कूरी॥ ॥मैनमग्ने विदहो माऽभिशोचो मास्यत्वचं चिक्षिपो माशरीरं। यदाशृ
तं कृणवो जातवेदोऽथेमेनं प्रहिणुतात्पितृभ्यः। शृतं यदा करसि जातवेदोऽथेमेनं
परिदत्तात्पितृभ्यः। यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति। सूर्यं
चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हि
तमोषधीषु प्रतितिष्ठा शरीरैः। अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अ

भिः। यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकं। अवसृज पुनर
ग्ने पितृभ्यो यस्त ऽआहुतश्चरति स्वधाभिः। आयुर्वसान ऽउपवेतु शेषः संगच्छ
तां तन्वा जातवेदः॥२॥ यत्ते कृष्णः शकुन ऽआतुतोद पिपीलः सर्प ऽउत वा
श्वापदः। अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ ऽआविवेश। अग्नेर्वर्म
परिगोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च। नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृ
ग्विधक्ष्यन्पर्यंखयाते। इममग्ने चमसं मा विजिह्वरः प्रियो देवानामुत सोम्यानां। २६
एष यश्चमसो देवपानस्तस्मिन्देवा ऽअमृता मादयंते। क्रव्यादमग्निं प्रहिणोमि
लो

दूरं यमराज्ञो गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु
प्रजानन्। यो ऽअग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसं।
तं हरामि पितृयज्ञाय देवं स घर्म्ममिन्वात्परमे सधस्थे॥२॥ इति ऋक्॰ जपित्वा
गाः दद्युः। ततो दहनांते दाहांजलिदानार्थं जलं प्रतिगच्छति सव्यावृतः। तस्मि
न्नवसरे पुरोहितादिः कश्चित् ब्राह्मणो मृत्योः पदमिति द्वाभ्यामृग्भ्यां अनुमंत्र
यते। मृत्योः पदं योपयंतो यदैत द्राघीय ऽआयुः प्रतरं दधाना॥ आप्यायमानाः प्रज
या धनेन शुद्धाः पूता भवत यज्ञियासः। इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा दे

तृ २

वर्हतिर्नो ऽभ्युघा। मा चो ऽभ्यागामनृतयेदसायत्ना घीय ऽआयुः प्रतरं दधानाः।
ततः पुन्नः आपोहिष्ठाक्रु कृ ऋज पित्वा। आपोहिष्ठामयोभुवस्तान ऽऊर्जेदधा
तन। महेरणाय चक्षसे। योवःशिवतमोरसस्तस्य भाजयतेहनः। उशतीरि
वमातरः। तस्मा ऽअरंगमामवोयस्यक्षयाय जिन्वथ। आपोजनयथा च नः।
शन्नोदेवीरभिष्टय ऽआपोभवन्तु पीतये। शंयोरभिस्रवन्तु नः। ईशानावार्या
णांक्षयन्तीश्चर्षणीनां। अपोयाचामिभेषजं। अप्सुमेसोमो ऽअब्रवीदन्तर्विश्वा २
निभेषजा। अग्निंचविश्वशंभुवं।।१।। आपःपृणीतभेषजंवरूथंतन्वे३मम। ज्यो

क्चसूर्यंदृशे। इदमापःप्रवहतयत्किंचदुरितंमयि। यद्वाहमभिदुद्रोहयद्वा
शेपऽउतानृतं। आपो ऽअद्यान्वचारिषंरसेनसमगस्महि। पयस्वानग्न ऽ
आगहितंमासंसृजवर्चसा। सस्रुषीस्तदपसोदिवानक्तंचसस्रुषीः। वरेण्य
क्रतुरहमादेवीरवसेहुवे।। इति निरुक्त ऋज पित्वा।। ।।उदकस्यस्पर्शंकिरोति।।
ततः।। सनाचसोमजेषिचपवमानमहिश्रवः। अथानोवस्यसस्कृधि। सनाज्यो
तिःसनास्वर्विश्वाचसोमसौभगा। अथा०धि। सनादक्षमुतक्रतुमपसोम
मृधोजहि। अथा०धि। पवीतारःपुनीतनसोममिंद्रायपातवे। अथा०धि। त्वं

सूर्येनुऽआ नेजन्त न वृकत्वात न वोतिभिः। अपां॰धि। त वृकत्वात न वोतिन्निर्योग्यैर।
न्द्येमु सूर्यौ। अपां॰धि। अन्यं र्षस्त्वायुध। सामं द्विवई सं रयिं। अपां॰धि। अन्नी र्षि
न पच्छतोरयिं समस्तु सासुहिः। अपां॰धि। त्वांयरक्षे र वीरद्धन्नपवमान विधर्मणि॥
अपां॰धि। रयिं न स्विन्नमश्विनमिंदो विश्वायुमानर॥ अपां॰धि॥२३॥ इति जपित्वा
उदकस्य स्पर्शं करोति। ततः स्नानं कृत्वा। अपसव्यं। उदकमुपकंगेऽनुप्रवेश्यति
लान् अधोमुखेन दर्भं त्रिं गृहीत्वा। दापांजलिं दद्यात्। अमुकसगोत्र अमुकप्रेत २८
तिलोदकांजलिस्ते। अंजलिं। आपोऽअस्मानिति मंत्रेण पवित्वा निःसरेत्। आ

पोऽस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु। विश्वं हि रिप्रं प्रवहंति दे
वीरुदिदाभ्यः शुचिरापूत एमि। ततः चितासेचनं। यं त्वमग्ने समदहस्तमु निर्वा
पया पुनः। कियांब्वत्र रोहतु पाकदूर्वा व्यल्कशा॥ शीतिके शीतिकावति ह्लादि
के ह्लादिकावति। मंडूक्यां सुसंगमय इमं स्वग्निं हर्षय। इति पुनरपि सक्षीरो
दकेन सिंचेत्। ततः उदककुंभेन चिताग्निं शामयित्वा॥ अस्थिसंचयनं॥ पलाश
पर्णपुटे ऊर्णावसंयुक्ते नव अस्थिखंडानि गृहीत्वा ततः शीतलं मृत्कुंभे आरोप्य
ततः उपकंठे प्रविश्य। उत्तिष्ठ नामीति जोष्ठेना पिधाय। जोष्ठं जोऽवततेभु

क्षमृत्तिकाखंडं। उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो॥ अहं रिषं।
एतां स्थूणां पितरो धारयंतु तेत्रा यमः सादना ते मिनोतु। ततः स्थूलं खनित्रेण
कंदं निखननार्थं खातं कृत्वा तस्मिन् गर्त्ते उच्छ्वंचस्वेति। अस्थिकंदं निखनेत्।
उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै नव सूपवंचना। माता पुत्रं यथा
सिचाभ्येनं भूम ऊर्णुहि। ततः उच्छ्वंचमानेति तं गर्तं मृत्तिका पूरयेत्। उच्छ्वं
चमाना पृथिवी सुतिष्ठतु सहस्रं मित उप हि श्रयंतां। ते गृहासो घृतश्चुतो २६
भवंतु विश्वाहास्मै शरणाः संत्वत्र। ततश्च स्थाने पिंडदानं॥ आचमनं प्राणाया

मः। अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्मरेत्पुंडरीकाक्षं स बा
ह्याभ्यंतरः शुचिः। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसु
रे॥ सप्तव्याधा दशार्णेषु मृगाः कालंजरे गिरौ। चक्रवाकाः सरद्वीपे हंसाः स
रसि मानसे। तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घम
ध्वानं यूयं तेभ्योवसीदत। देवताभ्यो महायोगिभ्य एव च नमः॥३॥ श्राद्धभू
मौ गयां ध्यात्वा ध्यात्वा देवं गदाधरं। ताभ्यां चैव नमस्कारं ततः श्राद्धं प्रवर्त्त
ते। गयायां स्वयमेव जनार्द्दनः। तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात्॥

देशकालपात्रद्रव्यश्रद्धासंपत्। अपसव्यं। दृष्टिनिपातादिदोषाद्रक्षणस्य
शुद्धिं। अस्थिसंचयनपिंडदानोपहाराणां पवित्रता। भूरादि। तिलानुगृही
त्वा। भूर्भुवः स्वः महः जनः तपः सत्यं। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्। मधुवाता ऋतायते० नवं तु नः। मधुत्रब्रांजलिः। अ
द्याद्य अमुकमासे पक्षे तिथौ वारे यथावर्तमाननक्षत्रयोगकरणमुहूर्तपर्व
नक्षत्रसमवाये एवं ग्रहगणविशिष्टे पुण्येकाले देशे च। शास्त्रोक्तपुण्यफलावाप्त्य ३०
र्थं। अमुकसगोत्रस्य अमुकप्रेतस्य अस्थिसंचयनदानमहं करिष्ये। स्तरणं।

नैवेद्यार्थे पिष्टं दृष्टपकूपात्रे कृत्वा। पात्रेजपः॥ अवनेजनं॥ अस्थिसंचयननिमित्तं अ
मुकस[illegible]त्र अमुकप्रे[illegible] अवनेनिक्ष्व। ततः पिंडदानं॥ अस्थिसंचयननिमित्तं अमु
कसगोत्र अमुकप्रेत एतत्ते। प्रत्यवनेजनं। अस्थिसंचयननिमित्तं अमुकसगो
त्र अमुकप्रेत अवनेनिक्ष्व। सूत्रं। आच्छादनं। एतत्ते वासः। चंदनपुष्पे। नैवेद्यं॥
आच्छादनचंदनगंधपुष्पधूपदीपनैवेद्यानि यथाशक्तितानि इदं नैवेद्यं शास्त्रोक्त
पुण्यफलावाप्त्यर्थं गोत्रप्रेतपिंडार्चनं नैवेद्यं ते॥ आच्छादनचंदनगंधपुष्पधू
पदीपनैवेद्यैः पिंडस्यार्चनविधेः परिपूर्णता। सव्यं। आचमनं। ताम्रपात्रमध्ये। सुप्रो

ह्रितं॥ द्वि वा आपः॥ सौमनस्यं॥ अक्षतं च॥ अपसव्यं॥ दत्तान्हितान्गृहीत्वा॥ अस्थि
संचयन निमित्तं कस्मैश्चिद्ब्राह्मणाय दास्यमानं आमान्नं यथोपस्कर सहितं गंधा
द्यर्चितं तन्निष्क्रयभूतं द्रव्यं वा अमुकसगोत्र अमुकप्रेत तते॥ ततो बद्धांजलिः॥ अ
स्य अस्थिसंचयन निमित्तं पिंडदान[illegible]र्मणो यन्न्यूनातिरिक्तं तत्सर्वं भवतां ब्राह्मणा
नां प्रसादात् विष्णुः प्रसादात् तीर्थदेवतानां प्रसादात् सर्वं परिपूर्णं॥ अनेन अ
स्थिसंचयन [illegible] अमुक [illegible] अमुक [illegible] प्रेतस्य [illegible] तृषा नि[illegible]त्तिः॥ मा ३१
ह्योक्तपुण्यफलावाप्तिः॥ इतउत्तर कर्मयोग्यताप्राप्तिः॥ न्यूनातिरिक्तं सर्वं परिपूर्णं॥